दिनाङ्क :- 03.05.2025 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्री-अङ्गोलाराष्ट्रपति:

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्याम् अङ्गोलादेशीयेन राष्ट्रपतिना जोआओ-मैनुअल-गोंकाल्वेस-लौरेंको- इत्यमुना साकं प्रतिनिधिमण्डल- स्तरीयां वार्तां समाचरिष्यति। उभयो: देशयोर्मध्ये विविधेषु क्षेत्रेषु द्विपक्षीयं सहकार्यं संवर्धयितुम् अनेकेषु सन्धिपत्रेषु हस्ताक्षरस्य सम्भावना दरीदृश्यते। अङ्गोलादेशस्य राष्ट्रपति: ह्य: त्रिदिवसीय-भारत-यात्रायाम् नवदिल्लीं प्रत्यागतवान्। तस्य विशिष्टं स्वागतं विमानपत्तनस्थानके विदेशराज्यमन्त्रिणा कीर्ति-वर्धन-सिंहेन कृतम्। तेन सह एकमुच्चस्तरीयप्रतिनिधिमण्डलमपि समागतम् यस्मिन् अनेके मन्त्रिण: वरिष्ठाधिकारिण: सञ्चारसमूहाश्च सन्निहिता: वर्तन्ते। राष्ट्रपते: लौरेंको इत्येतस्य अद्य राष्ट्रपतिभवनस्य प्राङ्गणे औपचारिकं स्वागतं समनुष्ठास्यते । तत्रासौ राष्ट्रपतिपदासीनया द्रौपदीमुर्मु इत्यनया साकं चर्चां विधास्यति। राष्ट्रपति: मुर्मु: अतिथिगणमान्यस्य स्वागतार्थम् भोजनस्यापि आयोजनं करिष्यति।

### वेब्स-सम्मेलनम्

सामुदायिक-रेडियो-इत्येतस्मिन् आधारितं राष्ट्रियसम्मेलनम् अद्य मुम्बय्यां प्रचल्यमाने वर्ल्ड-ऑडियो-विजुअल-एण्ड-एण्टरटेनमेंट-समिट वेब्सइत्याख्ये विश्व-श्रव्य-दृश्य-मनोरञ्जन-शिखर-सम्मेलने तृतीयदिवसे आयोजयिष्यते । कार्यक्रमे प्रकल्पित: विचारविमर्श: नवीनतमप्रवृत्तिषु नीतिषु कार्यक्रमेषु च केन्द्रितो भविष्यतीति। यस्य प्रयोजनम् व्यक्ते: शक्तिकरणं स्थानीयसमुदायेन साकं अधिकप्रभाविरूपेण संवाद- क्षमताया: संवर्धनमिति प्रतिपादितम्। एतदतिरिच्य सूचनाप्रसारण-राज्यमन्त्री एल्. मुरूगन् इत्ययम् अद्य एतस्मिन् शिखरसम्मेलने-**भारतस्य सजवकार्यक्रमगतार्थव्यवस्था एका-कार्यनीतिक-विकास-अनिवार्यता** इत्येतं शीर्षकाधारितं श्वेतपत्रम् प्रस्तोष्यति। श्वेतपत्रेऽस्मिन् भारतस्य मनोरञ्जनोद्योगस्य विस्तृतं विश्लेषणं प्रस्तूयते।

### अमितशाह:

केन्द्रीयगृहमन्त्री अमितशाह: अभिव्यक्तवातन् यत् स्वापक-नियन्त्रण- विभागस्य अमृतसर-मण्डल-विभागेन चतुर्षु राज्येषु प्रचालितानां चतुर्णां मासानाम् अभियानावधौ मादकद्रव्याणां सङ्ग्रहणं विनष्टीकृतम्। येषु सप्तचत्वारिंशदधिकपञ्चशतकोटिरूप्यकाणां_मादकद्रव्याणि अधिगृहीतानि अपरत्र पञ्चदश जना: गृहीता: । एकस्मिन् सामाजिक-सन्देश-पटले श्रीशाह: स्वापक-नियन्त्रण-विभागस्य वर्धापनानि प्रदत्तवान् उक्तवान् च यत् भारतं मादकद्रव्याणां समूहानां कठोराक्रमणेन दमनं कुर्वदस्ति।

### भारतीय-वायुदलम्

भारतीय-वायुदलेन ह्यः उत्तरप्रदेशस्य शाहजहानपुर-मण्डले गङ्गा-मोटारु-मार्गे सार्ध त्रि-किलोमीटर्-परिमिते दीर्घे मार्गे स्वस्य परिचालनक्षमतायाः भव्यप्रदर्शनं प्रदर्शितम्। अस्मिन् कार्यक्रमे, स्वप्रकारस्य प्रथमः कार्यक्रमः आसीत्, यस्मिन् राफ़ेल्, जग्वार्, मिराज् 2000- सु-30-एम्. के. आई- मिग्-29 इत्यादीनि उन्नत- योधृविमानानि, सम्मिलितानि।

### वेव्स-सम्मेलनम्

मुम्बई-नगरे पञ्चविंशत्यधिकद्विसहस्रतमवर्षीये विश्व-श्रव्य-दृश्य-मनोरञ्जन-शिखरसम्मेलने-वेव्स् इत्यस्मिन् सम्मेलने, क्रियेट्-इन्-इण्डिया चैलेंज (सि. आई. सि.) इत्यस्य प्रथमं सत्रं ह्यः समाप्तम् । सी. आई. सी. इत्यस्य अन्तर्गतम् द्वात्रिंशत् भिन्नप्रतिसन्धिनां विजेतारः सम्मेलनावधौ सम्मानिताः, यानिमेशन्, वीडियो-गेम्स्, सिनेमेटोग्राफ़ी इत्यतः ए. आई., सङ्गीतं, डिजिटल्-कलापर्यन्तं सञ्चारमनोरञ्जनोद्योगयो: सर्वाणि क्षेत्राणि आच्छादयन्। चैलेंज इतीदं उदयोन्मुखप्रतिभाभ्यः वैश्विकं मञ्चं प्रददात् तथा च युवमनस्सुकानां जीवन्त-सृजनात्मकतां प्रदर्शयत्। अस्मिन् अवसरे केन्द्रीयसूचना-प्रसारण-मन्त्री अश्विनीवैष्णवः, एतत् ऐतिहासिकं

क्षणम् इति उक्तवान्। प्रथमवारं पुरस्कारः विशुद्धतया सृजनात्मकतायाः कृते प्रदत्तः इति अवोचत्। सः सूचितवान् यत् अनेन उपक्रमेण निर्मातारः नूतनाः अवसराः संसारे प्रविशन्ति इति।

## आई.पी.एल्

आई.पी.एल्. इत्येतस्यां क्रिकेट-स्पर्धा-मालिकायाम् गतरात्रौ अहमदाबादनगरे गुजरात-टाइटन्स-दलेन सनराइजर्स- हैदराबाद-दलम् अष्टत्रिंशत्धावनाकैः पराजितम्। तत्रैव अद्य बेङ्गलुरूनगरस्य एम्. चिन्नास्वामि-क्रीडाङ्गणे रॉयल-चैलेन्जर्स- बेंगलुरूदलम् चेन्नई-सुपर-किंग्स-दलेन समम् क्रीडिष्यति। क्रीडैषा सायंकाले सार्धसप्तवादनतः क्रीडिष्यते।

**इति वार्ताः**